# औपनिषदः पुरुषः

**डा. ए.वि. नागसम्पिगे**
**निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्,**
**पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पामुख्यमार्गः,**
**बेङ्गलूरु-२८**

'तमेवं विद्वानमृत इह भवति' (तै.आ. ३.१.३), 'तमेवं विदित्वाऽऽति मृत्युमेति' (श्वेताश्व. ३.६.१५) इत्यादिश्रुतयः परमात्मतत्त्वज्ञानमेव मोक्षसाधनमित्याचक्षते । प्रत्यक्षागोचरस्य परमात्मस्वरूपस्याऽऽवेदनादेव वेदाः वेदा इत्युच्यन्ते । 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्ध्यते । एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।' 'वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदाः' इति श्रुतयोऽपि एतमेवार्थमवगमयन्ति । त्रय आचार्या एकमेव वैदिकवाङ्मयमुपजीव्य भिन्नमेव ब्रह्मस्वरूपमुपादिशन् । भाष्य-व्याख्यानविशेषाननवलम्ब्यैव वेदोपनिषदामेवाध्ययनेन तत्र कीदृशं परमात्मस्वरूपं निरूप्यत इति सङ्क्षेपेण निरूप्यते ।

अनन्तजीवजडोपेतमिदं विश्वं बुद्धिमतामतीव विस्मयावहं प्रतिभाति । किमिदं विश्वं स्वयमेवोत्पन्नम् आहोस्वित् केनचन परमपुरुषेण निर्मितम् ? अथवा बुद्धिमद्भिरेव बहुसङ्ख्याकैः जीवैः विनिर्मितमित्यस्ति विप्रतिपत्तिः । केचन मन्यन्ते विश्वमिदं मायिकमपरमार्थभूतम् इति । अत्र च **'इन्द्रो मायाभिः पुरुरूप ईयते'** (बृह.उ.२.५.१५) **'मायामात्रमिदं द्वैतम्'** (मा.का.१७) **'नासदासीत् नो सदासीत्'**(तै.ब्रा.२.८९.३) इत्यादिप्रमाणानि उल्लिखन्ति । वेद एव **'अकस्माद्धीदमाविरासीत् अकस्मात्तिष्ठति अकस्माल्लयमभ्युपैति'** (ब्र.सू.भा.२.१.१३ उदा. श्रुतिः) इति सृष्टेराकस्मिकत्वं श्रूयते । **'प्रधानादिदमुत्पन्नम्'** (ब्र.सू.भा.२.१.१३ उदा. श्रुतिः) इत्यादौ प्रधानकारणत्वम्, **'जीवाद्भवन्ति भूतानि'** (ब्र.सू.भा.२.१.१३ उदा. श्रुतिः) इत्यत्र जीवकारणकत्वम्, **'असदेवेदमग्र आसीत्'** (छा.उ.३.१९.१) **'असतस्सदजायत'** (ऋ.सं. १०.७२.२) इत्यादौ शून्यस्य विश्वप्रागभावस्य वा कारणत्वं, प्रतीयते । एवमनेक-विधासु विप्रतिपत्तिषु किं तत्त्वमिति संशयो जिज्ञासूनां भवत्येव । अत एव श्वेताश्वतरोपनिषदि-

**'किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः ।**
**अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ।।** (१-१)
**कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।**
**संयोग एषां नत्वात्मभावादात्माऽप्यनीशः सुखदुःखहेतोः ।।'** (१-२)

इति नैकविधा विप्रतिपत्तिरुद्घाटिता ।

**सृष्टिः पारमार्थिकी**

श्रुतयः स्मृतयश्च भगवतो माहात्म्यमवगमयितुं तेनैव कृतां सृष्टिं व्याख्यास्यन्ति । चित्रविचित्रस्य अनन्तस्य विश्वस्य प्रणेतृत्वाद्धि भगवतः सर्वज्ञत्वं भवति । यदीयं विश्वसृष्टिः मिथ्या स्यात् तर्हि भगवान् सत्यमहिमा न स्यात् । परन्तु **'सत्यस्सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये'** (ऋ.सं.८.३.४) इति श्रुतौ जगत्स्रष्टृत्वमहिमा पारमार्थिकीति प्रतिपादितम् । अस्याः श्रुतेः अयमर्थः- 'सः' जगत्स्रष्टृत्वादिरूपः 'अस्य' परमेश्वरस्य विष्णोः, महिमा सत्यः तं 'विप्रराज्ये' विप्रप्रधानेषु 'यज्ञेषु' पुण्यकार्येषु 'शवः' सुखमुद्दिश्य 'गृणे' स्तौमि ।

अनेनेदं विज्ञायते- श्रुत्युक्तविश्वकर्तृत्वमहिमा विश्वसत्यत्वमन्तरा नोपपद्यते । अत्र नैकाः श्रुतयः स्मृतयश्च प्रमाणं भवितुमर्हन्ति-

१. **'विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्'** (ऋ.सं.२.२४.१२) अस्यायमर्थः - 'मघवाना'=

हे मघवन्तौ, धनादिमन्तौ इन्द्राबृहस्पती 'युवोः' = युवयोः, विश्वं सत्यमेव । न केवलमहमेवं प्रतिपन्नः अपि तु 'आपश्चन' = आपोऽपि अबभिमानि-देवा अपि, 'वां प्रमिनन्ति' = भवदीयं जगत्सर्जनादिकं जानन्ति ।

२. **'प्रघान्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम्'** (ऋ.सं.२.१५.१) अयमर्थः- इदानीं 'अस्य महतः सत्यस्य' सर्वेश्वरस्य भगवतः महान्ति सत्यानि कर्माणि प्रावोचम्, व्याख्यातवान् । अत्रापि कर्मणां सत्यत्वं विषयसत्यतामन्तरेण नोपपद्यत इति विश्व-सत्यतासिद्धिः ।

३. **'कविर्मनीषी परिभूस्स्वयम्भूः याथातथ्यतोऽ-**
**र्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः'** (ईश.उ.८)

अत्र 'कविः' = सर्वज्ञः, मनीषी = मनसां इष्ट इति मनीषी, 'परिभूः' = सर्वोत्तमः, स्वयम्भूः = स्वतन्त्रः, 'शाश्वतीभ्यः समाभ्यः'= सर्वदा, 'अर्थान् = महदादीन् , 'याथातथ्यतः' = परमार्थत एव, 'व्यदधात्' = ससर्ज । अनेन सर्वज्ञात् सर्वेश्वरात् विधीयमानेयं सृष्टिः, सृष्टाश्चार्थाः परमार्था एव भवन्तीति स्पष्टमवगम्यते ।

४. ऋग्वेदेऽपि श्रूयते - **'ध्रुवा द्यौः ध्रुवा पृथिवी'** (ऋ.सं.१०.७३.४)
अस्यां श्रुतौ जगतः सत्यत्वं कण्ठरवेणैवोपवर्णितम् ।

५. **'यो नः पिता जनिता यो विधाता'** (ऋ.सं.१०.८२.३)

अत्रापि विश्वस्रष्टा भगवान् जनिता इति, रक्षणात् पिता इति च व्यवहृतः ।

६. श्वेताश्वतरोपनिषदि विप्रतिपत्तिमुद्घाट्य, स्वाधीनकालकर्म-प्रकृत्यादिकं स्वीकृत्य विष्णुर्विश्वं सृजतीति समाहितम्-

**'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् ।**
**यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ।।'** इति । (श्वेता.१-३)
तत्रैव–
**स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये परिमुह्यमानाः ।**
**देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ।।** (६-१)

इत्यत्र केवलजडकारणत्वं प्रतिषिध्य ब्रह्मकारणत्वं समर्थितम् ।

७. **'एको ह वै नारायण आसीत्'** (महो. १.१) **'नारायणः परं ब्रह्मेति य एवं वेद'** (ना.उ.ता. ३.१) **'नारायणाद् रुद्रो जायते'** (नारा. १) **'नारायणात् सर्वे देवा जायन्ते'** (त्रि.म.ना. २.७) इत्यादिश्रुतिशतपर्यालोचने नारायण एव जगज्जन्मादिकारणमिति विज्ञायते ।

**'एको नारायण आसीत् न ब्रह्मा न च शङ्करः'** (म.भा.ता.१-६३ उदा.प्रमाणवचनम्) इत्यत्र तु ब्रह्मरुद्रौ प्रतिषिध्य नारायणस्य स्रष्टृत्वं विश्वकारणत्वं च प्रतिपादितम् । रुद्रशब्दस्तु नारायणे समन्वेतुं शक्यते । नारायणशब्दस्तु न कथमपि रुद्रे नेतुं शक्यते । सर्वशब्द-वाच्यत्वं हि समुद्रान्तःस्थस्य विष्णोरेव प्रमितम् ।' तदुक्तं श्रीमध्वभगवत्पादाचार्यैः–

'अन्तःसमुद्रे' इत्याद्युक्त्वा **'तदेव ब्रह्म परमं कवीनां'** **'तन्नो विष्णुः'** इति वचनाद् विष्णुरेव हि तत्रोच्यते । **'अजस्य नाभाविति यस्य नाभेरभूत् श्रुतेः पुष्करं लोकसारम् । तस्मै नमो व्यस्तसमस्त-विश्वविभूतये विष्णवे लोककर्त्रे'** (ब्र.सू.भा.१.१.१-उदाहृतं स्कान्द-वचनम्) इति च स्कान्दे । **'परो दिवा पर एना पृथिव्या'** इति

समाख्याश्रुतौ **‘यं कामये तं तमुग्रं कृणोमि’** इत्युक्त्वा **‘मम योनिरप्स्वन्तःसमुद्रे’** इत्याह । समुद्रेऽन्तर्नारायणः । प्रसिद्धत्वात् सूचितत्वाच्चार्थस्य

**‘वेदे रामायणे चैव पुराणे भारते तथा ।**
**आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ।।’ इति ।** (ब्र.सू.भा.१.१.१ उदा हरिवंशवचम्)

तदेतत्सर्वं निवरकाशतया श्वेताश्वतरे भणितम्-

**‘स विश्वकृद् विश्वविदात्मयोनिर्ज्ञः कालकारः गुणी सर्वविद्यः ।**
**प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः’** ।। (६-१६)

अस्यायमाशयः । सः = पूर्वोक्तः विष्णुः । विश्वकृत् जगत्स्रष्टा । विश्ववित्= सर्वज्ञः । आत्मयोनिः= स्वेच्छया स्वीयरूपाणामाविष्कर्ता । ज्ञः = सामान्यज्ञानवान् । कालकारः = प्रवाहात्मककालस्य प्रवर्तकः । गुणी= अप्राकृत-गुणः । सर्ववित्= सर्वं विन्दत इति सर्ववित् आप्तकाम इत्यर्थः । प्रधानक्षेत्रज्ञपतिः= प्रकृतिजीवयोर्नियन्ता । गुणेशः= सत्वादिगुणानां नियामकः । संसारमोक्षस्थितिबन्धहेतुः= संसारिणां जीवानां सृष्टि-स्थिति-लय-बन्ध-मोक्षप्रदाता । अभिलषितार्थसाधकेन अनेन प्रमाणेन सर्वस्रष्टा, सर्वज्ञः, नारायणः सिध्यतीति सर्वमनवद्यम् । अत्रैव श्वेताश्वतरे ‘ज्ञः कालकालः’ इति मन्त्रे परस्य ब्रह्मणः नवगुणानभिधाय, अन्ते निर्गुणश्चेति पदेन प्राकृतगुणराहित्यमुक्तम् । अन्यथा अविद्यमानगुणकथनेन श्रुतेरप्रामाण्यप्रसङ्गः ।

**स्वाधीनया प्रकृत्या सृष्टिः**

सृष्टिं विधित्सुर्हि विष्णुः स्वाधीनया प्रकृत्या महत्तत्त्वादीन् उत्पादयन् विश्वमिदं सृजति । न च प्रकृतिं विना स्रष्टुमसमर्थस्य विष्णोः पारतन्त्र्यप्रसक्तिः । स्वानधीनवस्तुना किञ्चित् स्रष्टुरेव पारतन्त्र्यादिदोषदर्शनात् । किन्तु भगवतः विष्णोः सर्वस्यापि नियामकत्वेन प्रकृत्यादीनां च सदा तदधीनत्वेन स्वाधीनप्रकृत्यादिना विश्वस्रष्टुः भगवतः न विभवं किमपि हीयते । तदुक्तं महानारायणोपनिषदि-

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयन्तीं सरूपाः ।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।।** (२-५)

उक्तं च श्वेताश्वतरोपनिषदि-

**यच्च स्वभावं पचति विश्वयोनिः प्राच्यां च सर्वान् परिणामयेद् यः ।**
**सर्वमेतद् विश्वमधितिष्ठत्येको गुणांश्च सर्वान् विनियोजयेद् यः ।।** (५-५)

अत्रापि पदार्थस्वभावः प्रकृत्यादिनियन्तृत्वं विष्णोरुपवर्णितम् । एवञ्च स्वाधीन-प्रकृति-कर्म-अदृष्टादीन् निमित्ती-कृत्य विश्वं सृजतः विष्णोः माहात्म्यं न किञ्चन हीयते इत्यनुसन्धेयम् । अत्र च प्रकृतिः उपादानकारणमिष्यते । विष्णुस्तु निमित्तकारणमिति विज्ञेयम् ।

**शून्यात् न जगदुत्पत्तिः**

**‘असदेवेदमग्र आसीत्’**(छा.उ. ३.१९.१) **‘असतः सदजायत’**(ऋ.सं.२.७३) इत्यत्र विश्वप्रागभावस्य कर्तृत्वं श्रूयते । परन्तु निषेधैकस्वरूपस्य तस्य कर्तृत्वं कथमपि सम्भावयितुं न शक्यते । तदुक्तं सूत्रकारेण- **‘असदिति चेन्न प्रतिषेधमात्रत्वात्’** (ब्र.सू.२.१.८) इति । असच्छब्दः विष्णुमपि अभिदधाति । ‘न ह्येनमासादयति कश्चन’ इति व्युत्पत्त्या सर्वैरपि साकल्येन अवगन्तुमशक्यत्वात् विष्णुरसदुच्यते । **‘असतः सदजायत’** इत्यत्र **‘सद्वाव प्राणः असद् वाव ब्रह्म’** इति श्रुतिसमाख्यया असत्शब्दवाच्याद् विष्णोः सत्शब्दवाच्यः प्राणो जात इत्यर्थः ।

अत एव न शून्यादपि जगत्सृष्टिः । शून्याद्धि न किमपि जायमानम् अनुभूतम् । न चात्र किमपि प्रमाणमुपलभामहे । तदुक्तं सूत्रकृता- **'नासतोऽदृष्टत्वात्'** (ब्र.सू.२.२.२६) इति ।

एतेन **'अकस्माद्धीदमाविरासीत् अकस्मात् तिष्ठति, अकस्माल्लयमभ्युपैति'** (ब्र.सू.भा.२.१.१३ उदा. श्रुतिः) इत्यत्रापि अकस्मात्-शब्दः विष्णुवाचीति विज्ञेयः ।

**'प्रधानादिदमुत्पन्नम्'** (ब्र.सू.भा.२.१.१३ उदा. श्रुतिः) इति श्रुतिरपि प्रधानस्य उपादानकारणत्वं प्रतिपादयति न पुनर्विष्णोः निमित्तकारणत्वं प्रतिषेधति ।

**'जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः ।**
**जीवे तु लयमृच्छन्ति न जीवात् कारणं परम् ।।** (ब्र.सू.भा.२.१.१३ उदा.श्रुतिः)

इत्यादिश्रुतौ वेदव्याख्यानभूतपञ्चरात्रोक्तदिशा जीवशब्दः पञ्चव्यूहरूपान्तर्गतं जीवान्तर्गतं च सङ्कर्षणरूपिणं विष्णुमेवाऽऽह । एवं च न क्वापि भगवती श्रुतिः विष्णोरितरं जगत्कारणमाह ।

भगवतः सृष्टिकारणत्वं व्याख्यास्यन्तः केचनाभिन्ननिमित्तकारणत्वं प्रचक्षते । अत्र तु **'तत्सृष्ट्वा तदेवानुप्राविशत् सच त्यच्चाभवत्'**(तै.उ.२.६)**'तदनन्यत्वमारम्भणशब्दादिभ्यः'** (ब्र.सू. २.१.१५) इति श्रुतिसूत्रे प्रमाणयन्ति । परन्त्वाथर्वणोपनिषदि भगवतः उपादानकारणत्वं स्फुटं निराकृतं न विस्मर्तव्यम् । तदनन्यत्वाधिकरणं तु सर्वस्यापि कारणजातस्य विष्ण्वधीनत्वं प्रतिपादयति । न तदुपादानत्वं नवा तद्विवर्तत्वम् । अत्र त्वाथर्वणोपनिषत् प्रमाणम्-

**यथोर्णनाभिः सृजते गृह्णते च**
**यथा पृथिव्यामोषधयः सम्भवन्ति ।**
**यथा सतः पुरुषात् केशलोमानि**
**तथाऽक्षरात् सम्भवतीह विश्वम्** ।। (आथ.उ.१-७)

अयमर्थः- ऊर्णनाभिर्जन्तुविशेषः स्वोदरस्थितं वस्तु बहिर्निदधाति । इयमेव सृष्टिः । बहिःस्थापितमेव अन्ते पुनरपि स्वोदरे स्थापयति । इयमेव संहृतिः । एवञ्च ऊर्णनाभिजन्तुविशेषाद् भिन्नस्यैव वस्तुनः स्थापनं सृष्टिरित्युक्तत्वेन परिणामवादोऽपाकृतः । एवमेव ऊर्णनाभिजन्तुविशेषे बहिःस्थितं वस्तु यथा नाऽऽरोपितं तथैव ब्रह्मणि विश्वमपि नाऽऽरोपितम् । एतेन विवर्तवादः परास्तः ।

अत्र ब्रह्म कारणं भवत् निमित्तकारणमेव भवति इत्युक्तं- 'यथा पृथिव्यामोषधयः सम्भवन्ति' इति । पृथिवी किल शाल्यादीनि नानाबीजान्यपेक्ष्य यथा नानाविधाङ्कुरान् जनयति तथा विष्णुरपि नानाविधकर्माण्यनुसृत्य शरीराणि सृजति प्रेरयति च । अत एव तस्य न वैषम्यादिदोषः । इयं च विष्णोः सृष्टिः अनायासेन भवति । अत एव न फलापेक्षा । तदुक्तं-

**'यथा सतः पुरुषात् केशलोमानि ।**
**तथाऽक्षरात् सम्भवतीह विश्वम् ।।' इति** । (मु.उ.१.१.७)

अत्रैव उपनिषदि **'तपसा चीयते ब्रह्म'** (मु.उ.१.१.८) इत्यादिना ज्ञानपूर्विका सृष्टिः प्रतिपादिता । **'यः सर्वज्ञः सर्ववित्'** (मु.उ.१.१.९) इत्यत्रापि सर्वज्ञेन भगवता सृष्टिरत्र विधीयत इति प्रत्यपादि । एवञ्च बहुबाधस्यान्याय्यत्त्वात् श्रुतिशतगेगीयमानं विष्णोः सर्वकर्तृत्वं न निराकरणमर्हति ।

**विवर्तवादः न समीचीनः**

माण्डूक्यश्रुतिः नानामतानि विश्वकारणविषयकान्यनूद्य स्वाशयमाविश्चकार-

**‘विभूतिं प्रसवन्त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।**
**स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ।।** (१-१३)

**इच्छामात्रं प्रभोः सृष्टिः इति सृष्टौ विनिश्चिताः ।**
**कालात् प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ।।** (१-१४)

**भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमथ चापरे ।**
**देवस्यैष स्वभावोऽयं आप्तकामस्य का स्पृहा ।।’** (१-१५) इति ।

**अस्य अयमाशयः-** ब्रह्मपरिणामवादिनः असन्तः केचन जीवजडात्मना ब्रह्मणः परिणामं मन्यन्ते । अन्यैः वादिभिः सुप्तात्मविवर्तः गन्धर्वनगराकारो वा भासमानोऽयं प्रपञ्च इति कथ्यते । इमौ वादौ अनूद्य इच्छामात्रमित्यत्र स्वाभिप्रायं श्रुतिः समर्थयति । इयं सृष्टिः भगवतः इच्छयैव केवलया सम्भवति ।

अनया सृष्ट्या भगवतः प्रागनासादिता तृप्तिः सम्पद्यत इति केचन मन्यन्ते । अपरे तु महाराजस्य कन्दुकादाविव क्रीडार्थं विश्वसृष्टिरिति मन्यन्ते । श्रुतिस्तु स्वमतमाह- ‘देवस्यैष स्वभावोऽयम्’ इति । नित्यतृप्तस्य भगवतः सृष्ट्यादिना न किमपि प्रयोजनं प्रतीयते । तथापि परप्रयोजनार्थमेव विधीयमानेयं सृष्टिः सार्थक्यं भजते । तदुक्तं सूत्रकारेण- **‘न प्रयोजनवत्त्वात्’** (ब्र.सू. २.१.३३) इति ।

एवं च वेदोपनिषदां विमर्शनेन इदमवगम्यते- सर्वशब्दवाच्यः भगवान् विष्णुरेव । तेनैव हि जीवजडात्मकप्रपञ्चस्य सृष्टिर्भविता । सः विश्वस्य निमित्तकारणमेव । सृष्ट्याऽनया न किमपि तस्य प्रयोजनम् प्रतीयते । तथाऽपि जीवानामनुग्रहार्थं विधीयमाना इयं सृष्टिः तस्य परं कारुण्यमवगमयति । पूर्णस्य तस्य सृष्टिकर्तृत्वं स्वभाव एव । न ब्रह्म जगदात्मना परिणमति, न वा तद्विवर्तं जगत् इति ।

*****